❋ श्रीमते रामानुजाय नमः ❋

❋ श्रीगोदारङ्गमन्नारपरब्रह्मणे नमः ❋

श्रीवैष्णवानां वैकुण्ठोत्सवप्रयोगः

★

सम्वत् २०४३ गंगा दशहरा

* विषयानुक्रमः *

क्र० सं०	विषय	पृष्ठ सं०
१-	शुचिर्भूत्वा, पवित्रीसंधार्य, आचम्यप्राणानायम्यकेशवादीन् ध्यात्वा गुरुपरम्परामनुसन्धाय, आचार्यवरणं तत्पूजनञ्च संविधाय	१
२-	अथानुज्ञाप्रकारः	२
३-	श्रीविष्वक्सेनपूजनम्	३
४-	महासंकल्पः	४
५-	पुण्याहवाचनम्	५
६-	वरुणसूक्तम्	१०
७-	पवमानसूक्तम्	११
८-	पञ्चकलशस्थापनम्	१३
९-	पाठकर्तृश्रीवैष्णवानांवरणम्	२१
१०-	ततो विसर्जनम्	
११	पुण्याहवाचनप्रयोगः कारिकाश्च	अन्तिम कवरपृष्ठ



* श्रीमते रामानुजाय नमः *

* श्रीगोदारङ्गमन्नारपरब्रह्मणे नमः *

श्रीवैष्णवानां वैकुण्ठोत्सवप्रयोगः

सकलयिता—

श्रीवैकुण्ठवासी पण्डित श्रीदामोदराचार्यजी शास्त्री

वैदिक ज्योतिषाचार्यः

श्रीविजयराघव मन्दिर, विभीषणकुण्ड, अयोध्या

सम्पादक—

केशवदेव शास्त्री

श्रीदेवी प्रकाशन द्वारा प्रकाशितः

मूल्य [illegible]) रुपये २५)

सम्वत् २०४३ गंगा दशहरा १००० प्रतियाँ

उपोद्‌घातः

श्रियःपति नारायणचरणशरणमुपेयुषां श्रीभाष्यकारभगवद्रामानुजाचार्यसिद्धान्तबद्धदीक्षाणां, भगवतः प्राप्तौ भगवन्तमेवोपायत्वेन स्वीकुर्वतां श्रीवैष्णवानां शरीरत्यागानन्तरं श्रीवैकुण्ठधामप्राप्तिः सुनिश्चितेति राद्धान्तः।

पञ्चसंस्कारसंस्कृतानां श्रीमद्रामानुजचरणसम्बन्धिनां श्रीवैष्णवानां नाधःपतनं कदाचिदपि। यद्यपि 'प्रारब्धकर्मणां भोगादेव क्षय' इति सिद्धान्तः। तथापि भगवदाज्ञया भगवत्कैङ्कर्यत्वेन कर्मकुर्वतां, तैलधारावदविच्छिन्न स्मृतिसन्तानभाजां प्रपन्नानां भगवान् प्रारब्धकर्मापि प्रक्षिणोति। शरीरपातानन्तरं दशाहपर्यन्तं जीवस्य प्रेतसञ्ज्ञा, न सपिण्डनोत्तरम्।

शरणापन्नो जीवः पाञ्चभौतिकं कलेवरं परित्यज्य भगवतो नारायणस्य निर्हेतुकीकृपापरवशः मायामण्डलमपहाय विरजामवगाह्य विरजोभूत्वा नित्यमुक्तपरिसेविते वैकुण्ठधाम्नि भगवतः शेषाङ्कशायिनो नारायणस्यांके श्रीपुरस्कृतः स्नेहपालितो भवति।

तस्यैव जोवस्य वैकुण्ठगमनमभिलक्ष्येममुत्सवमामनन्ति श्रीवैष्णवाः। स चैषः 'श्रीवैष्णवानां वैकुण्ठोत्सवप्रयोगः' श्रीवैष्णवानां वैकुण्ठोत्सवकर्मणि मार्गदर्शको भविष्यति। तदत्रविषये पण्डितप्रवर श्रीस्वामि राघवाचार्याणां श्रीअयोध्यास्थविजयराघवमन्दिरस्योपाध्यक्षाणां पाण्डुलिपिप्रदात्रीं कृपां शिरसावधार्याभारं निवेदयति—

विनीतः
केशवदेवशास्त्री
अनन्त-सन्देश 'सम्पादकः'

ज्येष्ठ, श्रीगंगा दशहरा
सं० २०४३

॥ श्रीमते रामानुजाय नमः ॥

अथ श्रीवैष्णवानां वैकुण्ठोत्सवप्रयोगः

सपिण्डनानन्तरं कस्मिंश्चित् शुभदिने कर्त्ता शुचिर्भूत्वा कृतनित्यक्रियः शुभासने प्राङ्मुख उदङ्मुखो वा दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः, त्रिः प्राणानायम्य आचम्य । ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु ॥ इति मन्त्रेणात्मानं पूजासम्भारांश्च प्रोक्षयेत् ॥ ततो हस्तेषु पुष्पाक्षतमादाय ध्यायेत्—ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः । ॐ गोविन्दाय नमः । ॐ विष्णवे नमः । ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः । ॐ वामनाय नमः । ॐ श्रीधराय नमः । ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः । ॐ दामोदराय नमः । ॐ सङ्कर्षणाय नमः । ॐ वासुदेवाय

नमः । ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः । ॐ अच्युताय नमः । ॐ जनार्दनाय नमः । ॐ उपेन्द्राय नमः । ॐ हरये नमः । ॐ श्रीकृष्णाय नमः ।। ततो गुरुपरम्परामनुसन्धाय भगवन्तं पञ्चोपचारैः सम्पूज्य । ॐ स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः । विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम् ।। इत्यनुसन्धाय सर्व-लक्षण गुणसम्पन्नमाचार्य्यं वृणुयात् । स्वस्य दक्षिणहस्ते दर्भद्वयं गृहीत्वा "ममास्मिन् श्रीवैकुण्ठोत्सवकर्म्मणि त्वमा-चार्य्यो भव" ॐ वृहस्पतेऽअति यदर्य्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजात तदस्मासुद्द्रविणं धेहिचित्रम् ।। इति सम्प्रार्थ्याचार्य्यदक्षिणहस्ते दर्भद्वयं दद्यात् ।। तत आचार्य्यो वृतोस्मीति प्रतिवचनं दद्यात् । तत आचार्य्यं गन्धपुष्पवस्त्रालङ्कारदक्षिणादिभिः पूजयेत् ।।

अथानुज्ञा प्रकारः

तत आचार्य्येणानुज्ञातो यजमानः स्वाञ्जलिं बद्ध्वा-प्रार्थयेत्—ॐ नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगानां चक्षुषे नमो दिवे नमः पृथिव्यै सप्रथ सभां मे गोपाय ये च सभ्याः सभासदस्तानिन्द्रियावतः कुरु सर्वमायु-रुपासताम् ॐ ।। सर्व्वेभ्यः श्रीवैष्णवेभ्यो नमः इति श्रीवैष्णव

शिरस्सु पुष्पाक्षतान् विकिरेत् ॥ तत अञ्जलिं कृत्वा प्रार्थयेत् ॥ अशेषेह परिषद्भगवत्पादमूले मया समर्पितामिमां सौवर्णीं यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्यास्य भगवतः श्रीभूमिनीलासमेतस्य समस्तपरिवारस्य नित्याखण्डकैंकर्य्यप्राप्त्यर्थं अस्य वैकुण्ठोत्सवकर्म्मणो निर्विघ्न समाप्तिर्भूयात् इति भवन्तो महान्तोऽनुगृह्णन्त्विति परिषदमनुज्ञापयेत् ॥

अथ श्रीविष्वक्सेनपूजनम्

ततो यजमानो भगवन्तं साष्टाङ्गं प्रणम्य शुभासने प्राङ्मुखो वा उदङ्मुखः समुपविश्य भगवन्तं ध्यात्वा—श्रीभगवदाज्ञया भगवत्कैंकर्य्यत्वेन प्रारिप्सितस्य श्रीवैकुण्ठोत्सवकर्म्मणो निर्विघ्नसमाप्त्यर्थं आदौ श्रीविष्वक्सेनपूजनमहं करिष्ये । इति सङ्कल्प्य पलाशपर्णपुटे द्वादशकुश पत्रनिर्म्मितं कूर्चं निक्षिप्य तत्र ॐ सूत्रवतीसखं विष्वक्सेनं पूजयेत् ॥ तद्यथा—हस्ते अक्षतपुष्पाणि गृहीत्वा ध्यायेत्—

विष्वक्सेनं सकलविबुधप्रौढसेनाधिनाथं मुद्राचक्रे करयुगधृतं शङ्खदण्डौ दधानम् । मेघश्यामं समणिमुकुटं पीतवस्त्रं शुभाङ्गं, ध्यायेद्देवं दलितदनुजं सूत्रवत्या समेतम् ॥१

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् । विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥२॥ दिव्याकारं सरो-

जाक्षं शङ्खचक्रगदाधरम् ।। मुकुन्दद्वारनिलयं विष्वक्सेनं समाश्रये ।।३।। श्रीरङ्गचन्द्रमसमिन्दिरया विहर्तुं विन्यस्य विश्वचिदचिन्नयनाधिकारम् । यो निर्वहत्यनिशमंगुलिमुद्रयैव सेनान्यमन्यविमुखास्तमु शिश्रयामः ।।४।। वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।। यद्वेत्रशिखरस्पन्दे विश्वमेतद् व्यवस्थितम् ।।५।। इति सम्प्रार्थ्य "श्रीमते विष्वक्सेनाय नमः" इति मन्त्रेणार्घ्यपाद्याचमनस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणादिभिः सूत्रवतीसहितं श्रीविष्वक्सेनं सम्यक् प्रपूज्य गुरुपरम्परानुसन्धानपूर्वकं महासङ्कल्पं कुर्यात् ।

अथ महासङ्कल्पः

देशकालौ संकीर्त्य एवं गुणविशिष्टायां अस्यां शुभपुण्यतिथौ अमुकगोत्रः अमुकोऽहं ममात्मनः श्रुतिस्मृतिपुराणोक्तफलसिद्ध्यर्थे अमुकगोत्रस्य अमुकस्य दिवंगतस्य भगवदपचारभागवतापचारासह्यापचाररूपनानविधानन्तापचारनिवृत्तिपूर्वक —अशेषचिदचिद्वस्तुशेषीभूतस्य सत्यज्ञानानन्दामलत्वस्वरूपस्य श्रीभूमिनीलानायकस्य श्रीमन्नारायणस्य नित्यकैंकर्य्यप्राप्त्यर्थं एभिः श्रीवैष्णवैः सह अद्यारभ्यामुक संख्याकदिनावधि श्रीलक्ष्मीनारायणसन्निधौ श्रीवैकुण्ठोत्सवमहं करिष्ये । इति सङ्कल्प्य जलाक्षतद्रव्यकुशादिकं भूमौ क्षिपेत् ।

अथ पुण्याहवाचनप्रयोगः

तत्रादौ कलशस्थापनविधिना रजतमयं ताम्रमयं शुद्धं कलशं स्थापयेत् ॥ तद्यथा—ॐ महीद्यौः पृथिवीचनऽइमं यज्ञम्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥ इति भूमिं स्पृष्ट्वा ॥ ॐओषधयः समवदन्त सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्ब्राह्मणस्त ँ राजन्पारयामसि ॥ इतिभूमौ तण्डुलान् क्षिपेत् ॥ ॐ आजिघ्रकलशं मह्यात्वा व्विशन्त्विन्दवः, पुनरूर्ज्जानिवर्त्तस्व सानः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्रयिः ॥ इति कलशं स्थापयेत् ॥ ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्यस्कम्भसर्ज्जनीस्थो व्वरुणस्य ऽऋत सदन्न्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥ इति कलशे जलं पूरयेत् ॥ ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधे सोमो राजा व्विद्वान्यक्ष्मादमुच्यत । इति कलशे गन्धं क्षिपेत् ॥ ॐ याऽओषधीः पूर्व्वा जातादेवेभ्यस्त्रियुगम्पुरा ॥ मनैनुवब्भ्रूणा मह ँ शतन्धामानि सप्त च । इति कलशे सर्वौषधीः क्षिपेत् । ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥ एवानो दूर्व्वेप्प्रतनु सहस्रेण शतेन च ॥ इति कलशे दूर्व्वांकुरान् प्रक्षिपेत् ॥ ॐ अश्वत्थे वो निषदनं पर्ण्णेवोव्वसतिष्कृता ॥ गोभाजऽइतिकलासथयत्सनवथ पूरुषम् ॥ इति कलशे पञ्च पल्लवान् ॥ ॐ स्योनापृथिविनो भवान्नृक्षरानिवेशनी ॥

यच्छानः शर्म्म सप्प्रथाः ।। इति कलशे सप्तमृदः क्षिपेत् ।। ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ँ हसः ।। इति कलशे पूगीफलं क्षिपेत् ।। ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।। दधद्रत्नानिदाशुषे । इति कलशे पञ्चरत्नानि क्षिपेत् । ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुतेमा ङ्कस्म्मै देवाय हविषाव्विधेम । इति कलशे हिरण्यमुद्रां क्षिपेत् ।। ॐ युवासुवासाः परि-वीतऽआगात्सऽउश्रेयान् भवति जायमानः । तन्धीरासः कवयऽउन्नयन्ति स्वाध्योमनसादेवयन्तः ।। इति कलशं युग्म-वस्त्रेण वेष्टयेत् ।। ॐ पूर्णादर्व्विपरापतसुपूर्णा पुनरापत । व्वस्नेवव्विक्क्रीणावहाऽइषमूर्जं ँ शतक्रतो ।। इति कलशो-परिपूर्णपात्रं न्यसेत् । ओं याः फलिनीर्य्या । इति कलशो-परि नारिकेलफलं न्यसेत् । एवं विधिना पुण्याहकलशं संस्थाप्य हस्तेऽक्षतपुष्पाणि गृहीत्वा वरुणरूपिणं भगवन्तं कलशोपरि आवाह्य पूजयेत् । ओं तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानोहविर्भिः । अहेडमानोवरुणे हवोध्युरुश ँ समानऽआयुः प्रमोषीः । इति वरुणं साङ्गं सपरिवारं सशक्तिकमावाहयामि ।। ओं भूर्भुवः स्वः अपांपतिवरुणाय नमः, इति मन्त्रेण षोडशोपचारैः वरुणं सम्पूज्य गङ्गाद्यावाहयेत् । यथा—सर्वे

समुद्राः सरितस्तीर्थानि जलदानदाः। आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥१॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥२॥ कुक्षौ तु सागराः सप्त-सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदोह्यथर्वणः। अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥३॥ इत्यावाहनम् ॥ ततः कर्त्ता तुलसीपुष्पाणि हस्ते गृहीत्वा प्रार्थयेत्— देवदानव सम्वादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥१॥ त्वत्तोये सर्व तीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥३॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्त्तु-मीहे जलोद्भव ॥४॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥५॥ नमो नमस्ते स्फटिक प्रभाय सुश्वेत हाराय सुमङ्गलाय। सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥६॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक। पुण्याह वाचनं यावत्तावत्त्वं सन्निधौ भव ॥७॥ इति प्रार्थना। इति कलशस्थापनम् ॥

ततो यजमान आचम्य प्राणानायम्य संकल्पं कुर्यात्। तद्यथा—ओं भगवदाज्ञया भगवत्कैंकर्यत्वेन अस्मिन् श्रीवै-

कुण्ठोत्सवकर्मणि सर्वोपकरणशुद्ध्यर्थं शरीरशुद्ध्यर्थं, गृह-शुद्ध्यर्थं पुण्याहवाचनं करिष्ये इति संकल्प्य तदर्थं यथा नाम गोत्रांश्चतुरो ब्राह्मणान् अहंवृणे। इति वृणुयात्। ततः चतुरः श्रीवैष्णवान् ब्राह्मणान् दर्भहस्तान् पुरतः प्रतिष्ठाप्य ब्राह्मणानां हस्ते सुप्रोक्षितादिकं कार्यं। शिवा आपः सन्तु। ओं सन्तु शिवा आपः। सौमनस्यमस्तु। ओं अस्तु सौमनस्यम्। अक्षतं चारिष्टं चास्तु। ओं अस्त्वक्षतमरिष्टं च। गन्धाः पान्तु सौमङ्गल्यं चास्तु इति भवन्तो ब्रुवन्तु। ओं गन्धाः पान्तु सौमङ्गल्यं चास्तु। अक्षताः पान्तु आयुष्यमस्तु इति भवन्तो ब्रुवन्तु। ओं अक्षताः पान्तु आयुष्यमस्तु। पुष्पाणि पान्तु सौश्रियमस्तु। इति भवन्तो ब्रुवन्तु॥ ओं पुष्पाणि पान्तु सौश्रियमस्तु। ताम्बूलानि पान्तु ऐश्वर्यमस्तु इति भवन्तो ब्रुवन्तु। ओं ताम्बूलानि पान्तु ऐश्वर्यमस्तु। दक्षिणाः पान्तु बहुधनमस्तु इति भवन्तो ब्रुवन्तु। ओं दक्षिणाः पान्तु बहुधनमस्तु। पुनरत्रापः पान्तु स्वर्चितमस्तु इति भवन्तो ब्रुवन्तु। ओं पुनरत्रापः पान्तु स्वर्चितमस्तु। ततोयजमान आचार्यादीन् ब्राह्मणान् च प्रणम्य अवनिकृत-जानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरसि कृत्वा ब्राह्मणान् प्रार्थयेत्। व्रतजपनियमतपःस्वाध्यायक्रतुसमदम दयादानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् इतियजमानो ब्रूयात्। समाहित मनसः स्म इति ते विप्राः

प्रतिब्रूयुः । यजमानः—प्रसीदन्तु भवन्तः । विप्राः—प्रसन्नाः स्मः । यजमानः—भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये । विप्राः -वाच्यताम् । तत उदकुम्भं सव्यहस्ते निधाय दक्षिणहस्तेन पिधाय ब्राह्मणैर्वाचयेत् । यजमानः—अस्मिन् श्रीवैकुण्ठोत्सवकर्मणि पुण्याहं भवन्तो ब्रुवन्तु । विप्राः—पुण्याहमस्तु । यजमानः श्रीवैकुण्ठोत्सवकर्मणः स्वस्ति भवन्तो ब्रुवन्तु । विप्राः—स्वस्तिरस्तु । यजमानः श्रीवैकुण्ठोत्सवकर्मणः कल्याणं भवन्तो ब्रुवन्तु । विप्राः—कल्याणमस्तु । यजमानः—श्रीवैकुण्ठोत्सवकर्मणः ऋद्धि भवन्तो ब्रुवन्तु । विप्राः - ऋद्धिरस्तु । यजमानः—श्री वैकुण्ठोत्सवकर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु । विप्राः—अस्तु श्रीः,ततः कुम्भं पूर्ववद्भूमौ निधाय प्रार्थयेत्,यजमानः—पुण्याह समृद्धिरस्तु । शिवं कर्मास्तु । प्रजापतिः प्रीयतामिति भवन्तो ब्रुवन्तु । विप्राः—पुण्याहसमृद्धिरस्तु, शिवं कर्मास्तु, प्रीयतां भगवान् प्रजापतिः । ततो यजमानः कूर्चेन वक्ष्यमाणवाक्यैः कुम्भाज्जलं पर्णपुटे निषिञ्चेत् । यथा—ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ ऋद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु । ओं आरोग्यमस्तु । ओं धनधान्यसमृद्धिरस्तु । ओं गोब्राह्मणेभ्यशुभम्भवतु । ईशान्यां बहिर्देशे ओं अरिष्टनिरसनमस्तु । दक्षिणस्यां—ओं यत्पापं रोगं तद्दूरेप्रतिहतमस्तु । उत्तरे—ओं कर्मण्य-

विघ्नमस्तु । ओं उत्तरोत्तराभिवृद्धिरस्तु । ओं सर्वशोभन-मस्तु । ओं सर्वाः सम्पदः सन्तु । ओं शुभानि वर्द्धन्ताम् । ओं शान्तिः शान्तिः शान्तिः इति सर्वे ब्राह्मणाः प्रतिब्रूयुः । ततः पर्णपुटजलं कुम्भे —ओंभूर्भुवः स्वरोम् इति निक्षिपेत् । ततः सर्वे ब्राह्मणाः दर्भैः कलशं स्पृशन्तो वक्ष्यमाण मन्त्रा-न्पठेयुः ।

वरुणसूक्तम्

ओं हिरण्य वर्णाः शुचयः पवित्राः पावको यासु जातः कश्यपोयास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्तान् आपः शᳬस्योना भवन्तु ।।१।। यासां राजा वरुणो यातिमध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चयुतः शुचयो याः पावका-स्तान आपःशᳬस्योना भवन्तु ।।२।। यासां देवा हि विक्-ण्वन्ति भक्ष्यं या अन्तरिक्षे बहुधा भवन्ति । या पृथिवीं पयसोन्दन्ति शुक्रास्तान आपःशᳬस्योना भवन्तु ।।३।। आपो हिष्ठामयो भुवस्तान ऊर्ज्जे दधातनः ।। महेरणाय चक्षसे ।।४।। योवः शिवतमो रसस्तस्य भाजयते हनः । उशतीरिव मातरः ।।५।। तस्मा अरङ्ग मामवो यस्य क्षयाय जिन्वथ । आपो जन यथा च नः ।।६।। सुमित्रियान आप ओषधयः सन्तु दुर्म्मित्रियास्तस्मै सन्तु । योऽस्मान्द्वेष्टि यञ्चवयं-द्विष्मः ।।७।। हिरण्य शृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि

याचितः। यन्मयाभुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥८॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो-वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः ॥९॥ अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना ह्यवमर्शतु ॥१०॥ सोहमपापो विरजो निर्मुक्तोमुक्त-किल्विषः। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम् ॥११ इमं मे गंगे यमुने सरस्वति शतद्रुस्तोमं सचता परुष्णिया। असिक्निया मरुद्वृधे वितस्तियार्जीकिये शृणु ह्यासुषोमया ॥१२॥ नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥१३॥

अथ पवमानसूक्तम्

ओं पवमानः सुवर्जनः पवित्रेण विचर्षणी। यः पोता स पुनातु माम् ॥१॥ पुनन्तु मा देवजना पुनन्तु मनवोधियः पुनन्तु विश्व आयवः ॥२॥ जातवेदः पवित्रवत्पवित्रेण पुनाहि मा। शुक्रेण देव दीद्यत् अग्ने क्रत्वा क्रतुँरनु ॥३॥ यत्ते पवित्र मर्चिषि अग्ने विततमन्तरा ब्रह्म तेन पुनीमहे ॥४ उभाभ्यां देव सवितः पवित्रेण सवे नच। इदं ब्रह्म पुनीमहे ॥५॥ वैश्वदेवी पुनती देव्यागाद्यस्यै वह्वी स्तनुवो वीत-पृष्ठाः ॥ तया मदन्त सधमाद्येषु वयँस्याम पतयोरयीणाम् ॥६॥ वैश्वानरो रश्मिभिर्मा पुनातु वातः प्राणेन शिरयो

मयो भूः ।। द्यावा पृथिवी पयसा पयोभि ऋतावरी यज्ञिये मा पुनीताम् ।।७।। वृहद्भिः सवितस्तृभिर्वर्षिष्ठैर्देव मन्मभिः अग्नेदक्षैः पुनीहिमा ।।८।। येन देवा अपुनन्त येनापो दिव्यं कशः । तेन दिव्येन ब्रह्मणा इदं ब्रह्म पुनीमहे ।।९।। यः पावमानी रध्येति ऋषिभिः सम्भृतोरसः ।। सर्वं सपूतमश्नाति श्वदितं मातरिश्वनः ।।१०।। पावमानीर्योऽध्येति ऋषिभिः सम्भृतो रसः । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ।।११।। पावमानी स्वस्त्ययनी सुदुघाहि पयस्वती । ऋषिभिः सम्भृतो रसः ब्राह्मणेष्वमृतं हितम् ।।१२।। पावमानीर्दिशन्तु न इमं लोकमथो अमुम् । कामान्समर्द्धयन्तु नः । देवीर्देवैः समाभृताः ।।१३।। पावमानीः स्वस्त्ययनी सुदुघाहि घृतच्युताः । ऋषिभिः सम्भृतोरसः । ब्राह्मणेष्वमृतं हितम् ।।१४।। येन देवाः पवित्रेण आत्मानं पुनते सदा । तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ।।१५।। प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम् तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ।।१६।। इन्द्रः सुनीतिः सह मा पुनातु सोमस्वस्त्या वरुणः समीच्या । यमो राजा प्रमृणाभिः पुनातु जातवेदो मोर्जयन्त्या पुनातु ।।१७।। ॐ भूर्भुवः स्वः तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये । दैवोस्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः उर्ध्वं जिघातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे ।१८। ॐ शान्तिः शान्तिः शान्तिः ।।

ततो ब्राह्मणानां हस्तेभ्यः कुशानादाय पुण्याहकलश-समीपे स्थापयेत् । ततः पुण्याहकलशं सव्यपाणौ निधाय दक्षिणहस्तेन कूर्चाम्रपल्लवैः श्रीवैष्णवान् पूजासम्भारांश्च सम्यक् प्रोक्षयेत् । पुण्याहकलशं शुचौ विविक्तदेशे सुर-क्षितं स्थापयेत् ।

अथ पञ्चकलशस्थापनम्

ततो यजमानः पञ्चहस्तमितं चतुरस्रं शुचिस्थलं गोमयोदकेनोपलिप्य रङ्गवल्ल्यादिना चित्रितं विधाय तत्र पञ्चसेटकपरिमितं धान्यमास्तीर्य, तस्योपरि नूतनशुभ्र-वस्त्रं प्रसार्य, वस्त्रोपरि पञ्चसेटकं तिलमपि विकिरेत् । तिलोपरि पुनः शुभ्रवस्त्रं प्रसार्य, तस्योपरि पञ्चसेटक परिमितं तण्डुलं प्रक्षिप्य पुनः वस्त्रं प्रसार्य,वस्त्रोपरि अक्षत-पुष्पाणि विकीर्य चतुर्दिक्षु चतुरः कलशान् सूत्रवेष्टितान् तथा मध्ये एकं सुप्रशस्तकलशं सूत्रवेष्टितं च संस्थापयेत् । ततः कलशस्थापन विधिना सर्वान् कलशान् प्रतिष्ठाप्य तेषु कल-शेषु हिरण्यकुशपञ्चगव्यादिकं सम्भृत्य गुरुपरम्परां मनसा-ध्यात्वा पूजनमारभेत् ।

ततो मध्यकुम्भे—ॐ नमो भगवते वासुदेवाय इति नाममन्त्रेण वासुदेवमावाह्य — अर्घ्यादिषोडशोपचारैः सम्पूज्य प्रणमेत् । ततः पूर्वादिकलशेषु क्रमेण प्रद्युम्न,

अनिरुद्ध, सङ्कर्षण, अधोक्षजान् नाममन्त्रेणावाह्य—अर्घ्या-दिभिः षोडशोपचारैः पूजयेत् । ततो यजमानः पुनः हस्तेऽ-क्षत पुष्पाणि गृहीत्वा मध्ये कलशोपरि ब्रह्माणं सम्पूजयेत् । यथा ॐ ब्रह्म जज्ञानं प्रथमं पुरताद्विसीमतः सुरुचोव्वेनऽ-आवः । सबुध्न्याऽउपमाऽअस्यव्विष्ठ्ठाः सतश्चयोनिमसतश्च व्विवः । ॐ ब्रह्मणे नमः" इति मन्त्रेण ब्रह्माणमावाह्य अर्घ्यादिभिः षोडशोपचारैः पूजयेत् । ततः पूर्वकलशोपरि-- ॐ अग्निमीले पुरोहितं यज्ञस्य देव मृत्विजम् । होतारं रत्न धातमम् । ओं ऋग्वेदपुरुषाय नमः । ऋग्वेदमावाह्य तस्मिन् कलशोपरि--ओं कुमुदाय नमः । ओं कुमुदाक्षाय नमः । ओं पूर्णाय नमः । ओं पुष्कराय नमः । इति नाम मन्त्रेणाबाह्यसम्यक् षोडशोपचार्यैः पूजयेत् । ततो दक्षिण कलशोपरि हस्तेऽक्षतपुष्पाणि गृहीत्वा ध्यायेत्—ओं इषेत्वो-र्ज्जेत्वा व्वायवस्स्थ देवो व. सविता प्रार्प्पयतुश्श्रेष्ठ्ठतमाय कर्म्मणेऽआप्यायद्ध्वमग्घ्न्याऽइन्द्राय भागं प्रजावतीरनमीवा-ऽअयक्ष्मामामावस्तेनऽईशतमाघशᳪसोद्ध्रुवाऽअस्म्मिन्न्गोपतौ स्यात वह्वीर्यंजमानस्य पशून्पाहि । ओं यजुर्वेदपुरुषाय नमः । ओं पुण्डरीक्षाकाय नमः । ओं वामनाय नमः । ओं आनन्दाय नमः । ओं नन्दनाय नमः । इति नाममन्त्रेणा-वाह्य षोडशोपचारैः पूजयेत् । ततः पश्चिमकुम्भोपरि हस्तेऽअक्षतपुष्पाणि गृहीत्वा ध्यायेत्—ओं अग्नऽआयाहि

वीतये गृणानो हव्य दातये। निहोता सत्सिबर्हिषि ॥ ओं सामवेदपुरुषाय नमः। ओं शंकुकर्णाय नमः। ओं सर्प नेत्राय नमः। ओं वीरसेनाय नमः। ओं सुसेनाय नमः। इति नाममन्त्रेण पश्चिमकुम्भे अर्घ्यादि षोडशोपचारैः पूजयेत्। तत उत्तरकलशे--हस्ते पुष्पाक्षतं गृहीत्वा ध्यायेत् ओं शन्नोदेवीरभीष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्त्र-वन्तु नः। ओं अथर्वणवेदपुरुषाय नमः। ओं सुमुखाय नमः। ओं सुप्रतिष्ठिताय नमः। ओं सम्भवाय नमः। ओं प्रभवाय नमः। इति नाममन्त्रेणावाह्य षोडशोपचारैः सम्यक् पूजयेत्। ततः सर्वान् कलशान् सुप्रशस्तवस्त्रेणावेष्ट्य नीराञ्जनं कृत्वा हस्ते पुष्पाणि गृहीत्वा उत्थाय पुष्पाञ्जलिं दद्यात्। तद्यथा--ओं यज्ञेनयज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। तेह नाकम्महिमा नः सचन्त यत्र पूर्वे साद्ध्याः सन्ति देवाः। ओं राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। समे कामान् काम कामाय मह्यं कामेश्वरो वैश्रवणो ददातु। कुवेराय वैश्रवणाय महा-राजाय नमः। ओं स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्त पर्यायी स्यात् सार्वभौमः सर्वायुष आन्तादापरार्धात्। पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येषश्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्या

वसन्गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति । ओं विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतो बाहुरुतविश्वतस्पात् । सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः । इति मन्त्रैः पुष्पाञ्जलिं समर्प्य साष्टाङ्गं प्रणमेत् ।

अथ वरणम्

ततो यजमानो गन्धाद्युपचारैः सर्वान् श्रीवैष्णवान् सम्पूज्य हस्ते जलाक्षतकुशादिवरणद्रव्यं चादाय—देशकालौ संकीर्त्य अमुकगोत्रः अमुकोऽहं श्रीवैकुण्ठोत्सवकर्मणि-वेदद्रविणप्रबन्ध श्रीवचनभूषण गद्यत्रय श्रीरामायण श्रीमद्भागवत विष्णुपुराण महाभारत भगवद्गीता विष्णुसहस्रनाम श्रीभाष्यस्तोत्ररत्नादीनां यथाभागानां यथाप्राप्तकालेषु नानानामगोत्रान् श्रीवैष्णवान् पाठकर्तृत्वेन युष्मान् वृणे । ओं वृताः स्मः इति प्रतिवचनम् । श्रीवैकुण्ठोत्सवकर्मणि श्रीवैष्णवानां हस्तेषु जलाक्षतकुशादिकं दद्यात् । रक्षासूत्रं बध्नीयात् पुनः श्रीवैष्णवानां शिरसि—सर्वेभ्यः श्रीवैष्णवेभ्यो नमः" इत्युक्त्वा शोभनाक्षतादिकं प्रक्षिपेत् । ततः सर्वे श्रीवैष्णवा यथायोग्याः स्व स्वस्थानेषूपविश्य पाठमारभेयुः । ततो यजमानः सर्वान् श्रीवैष्णवान् साष्टाङ्गं प्रणम्य प्रधानदेवस्याग्रे—अपराधसहस्रभाजनं"

इत्यादिकं श्लोकमुच्चार्य साष्टाङ्गं प्रणम्य अर्चक द्वारा भगवन्तं षोडशोपचारैः पूजनं कारयेत् । तथा च अष्टोत्तरशतनामभिः वा सहस्रनामावलिभिः तुलसीमर्पयेत् । भगवत्सन्निधौ नित्यपाठपर्यन्तं घृतेन तिलतैलेन वा दीपं प्रज्वालयेत् ।

ततः पाठदिनात् आरभ्य यजमानः शुचिर्भूत्वा कृतनित्यक्रियः आवाहितदेवान् षोडशोपचारैः सम्यक् पूजयेत् । तथा नित्यप्रति श्रीवैष्णवान् सम्यक् गन्धादिभिः समर्चयेत् । एवं विधानेन श्रीवैकुण्ठोत्सवसमाप्तिदिने यजमानः सर्वैः श्रीवैष्णवैः इक्षुदण्डगृहीतैः स्तोत्रादिपठितैः सह कुर्वद्भिः कस्मिश्चित् जलाशये गत्वा स्नानादिकं विधाय धृतोर्ध्वपुण्ड्रः जलाशये गन्धादिना वरुणं सम्पूज्य पुण्याह कलशं विविक्तस्थाने संस्थाप्य वैकुण्ठतर्पणं कुर्यात् । तद्यथा—यजमानः स्वगृह्योक्तप्रकारेण देवर्षिपितृतर्पणं विधाय वैकुण्ठपार्षदतर्पणं कुर्यात् । तत्र जलाक्षतकुशमादाय देशकालौ संकीर्त्य—ओं भगवदाज्ञया भगवत्कैंकर्यत्वेन अमुकगोत्रस्य अमुकस्य दिवंगतस्य भगवदपचार भागवतापचारासह्यापचाररूपनानाविधानन्तापचारनिवृत्तिपूर्वकं श्रीमन्नारायणस्य नित्यकैंकर्यप्राप्तिकामो वैकुण्ठपार्षदतर्पणमहं करिष्ये । ततो यजमानः स्वहस्ते पुष्पाक्षतकुशमादाय देवतीर्थेन एकैकाञ्जलिना तर्पयेत् ।

ओं आधारशक्तिस्तृप्यताम् । ओं प्रकृतिस्तृप्यताम् । ओं अखिलजगदाधारकूर्मरूपनारायणस्तृप्यताम् । ओं अनन्त नागराजस्तृप्यताम् । ओं भूमिस्तृप्यताम् । ओं वैकुण्ठ दिव्यलोकस्तृप्यताम् । ओं वैकुण्ठदिव्यजनपदस्तृप्यताम् । ओं वैकुण्ठदिव्यनगरस्तृप्यताम । ओं वैकुण्ठदिव्यविमान-स्तृप्यताम् । ओं आनन्दमयदिव्यमण्डपरत्नं तृप्यताम् । ओं आस्तरणरूप्यनन्तनागराजस्तृप्यताम् । ओं धर्मपीठ-पादस्तृप्यताम् । ओं ज्ञानपीठपादस्तृप्यताम् । ओं वैराग्य पीठपादस्तृप्यताम् । ओं ऐश्वर्यपीठपादस्तृप्यताम् । ओं ऋग्वेदपीठवाहकस्तृप्यताम् । ओं यजुर्वेदपीठवाहकस्तृप्य-ताम् । ओं सामवेदपीठवाहकस्तृप्यताम् । ओं अथर्ववेद-पीठवाहकस्तृप्यताम् । ओं अधर्मपीठगात्रस्तृप्यताम् । ओं अज्ञानपीठगात्रस्तृप्यताम् । ओं अनैश्वर्यपीठगात्रस्तृप्यताम् । ओं एभिः परिच्छिन्नतनुसदसदात्मकपीठभूतनागराज स्तृप्यताम् । ओं पीठस्योपर्यष्टदलं पद्मं तृप्यताम् । ओं वह्निमण्डलं तृप्यताम् । ओं सोममण्डलं तृप्यताम् । ओं सूर्यमण्डलं तृप्यताम् । ओं विमला चामरहस्ता तृप्यताम् । ओं क्रियाचामरहस्ता तृप्यताम् । ओं उत्कर्षिणी तृप्य-ताम् । ओं ज्ञाना तृप्यताम् । ओं प्रह्वी तृप्यताम् । ओं सत्या तृ०। ओं ईशाना तृ० । ओं योगा तृ० । ओं अनुग्रहा तृ० । ओं जगतप्रकृतिः तृ० । ओं सहस्रशीर्षानन्तनागराजस्तृ गुरवस्तृप्यन्ताम् श्रीरामानुज स्तृप्यताम् । ओं श्री पूर्णमिश्र

स्तृप्यताम् । ॐ श्रीमद्यामुनमुनिस्तृप्यताम् । ॐ श्रीराम मिश्रस्तृप्यताम् । ॐ श्रीपुण्डरीकाक्षस्तृप्यताम् । ॐ श्रीमन्नाथमुनिस्तृप्यताम् । ॐ श्रीशठकोपस्तृप्यताम् । ॐ श्रीविष्वक्सेनस्तृप्यताम् । ॐ श्रीस्तृप्यताम् । ॐ श्रीधर-स्तृप्यताम् । श्रीसुदर्शनहेतिराजस्तृप्यताम् । ॐ श्रीपाञ्च-जन्यशंखाधिपतिस्तृप्यताम् । ॐ श्रीकौमोदकीगदाधिपति स्तृप्यताम् । ॐ श्रीनन्दकखड्गाधिपतिस्तृप्यताम् । ॐ श्रीशार्ङ्गचापाधिपतिस्तृप्यताम् । ॐ श्रीवत्सश्रीनिवास स्तृप्यताम् । ॐ श्रीकौस्तुभसर्वरत्नाधिपतिस्तृप्यताम् । ॐ वैजयन्ती वनमालातृप्यताम् । ॐ ह्रीं पुष्टिस्तृप्यताम् । ॐ ऐं सरस्वतिस्तृप्यताम् । ॐ द्रां निद्रा तृप्यताम् । ॐ क्लीं कान्तिस्तृप्यताम् । ॐ कं पृथिवी तृप्तताम् । ॐ गं गरुडस्तृप्यताम् । ॐ किरीटमुकुटाधिपतिस्तृप्यताम् । ॐ किरीटमालाआपीडात्मिका तृप्यताम् । ॐ मकराकृति कुण्डलौ तृप्येताम् । ॐ कण्ठिकाभरणं तृप्यताम् । ॐ श्रीमत्तुलसी तृप्यताम् । ॐ हारसर्वाभरणाधिपतिस्तृप्यताम् ॐ काञ्चीगुणोज्वलपीताम्बरस्तृप्यताम् । ॐ सर्वाणि-भगवद्भूषणानितृप्यन्ताम् । ॐ सर्वे भगवद्दिव्यायुधास्तृप्य-न्ताम् । ॐ सर्वाभगवत्पादसंवाहिन्यस्तृप्यन्ताम् । ॐ सर्वे भगवत्परिकरास्तृप्यन्ताम् । ओं अनन्तस्तृप्यताम् । ओं विष्वक्सेन स्तृप्यताम् । ओं सूत्रवती तृप्यताम् । ओं जं

जयत्सेनस्तृप्यताम् । ओं गं गजाननस्तृप्यताम् । ओं हं हयाननस्तृप्यताम् । ओं कंकालप्रकृतिसंज्ञस्तृप्यताम् । ओं सर्वे विष्वक्सेनपरिजनास्तृप्यन्ताम् । ओं चण्डस्तृ० । ओं प्रचण्डस्तृ० । ओं भद्रा स्तृ० । ओं सुभद्रा तृ० । ओं जया तृ० । ओं विजया तृ० । ओं धातातृ० । ओं विधाता तृ० । ओं कुमुदः सायुधः सपरिवारः सशक्तिक स्तृ० । ओं कुमुदाक्षः सायुधः सपरिवारः सशक्तिक स्तृ० । ओं पुण्डरीकः सायुधः सपरिवारः सशक्तिक स्तृ० । ओं वामनः सायुधः सपरिवारः सशक्तिक स्तृ० । ओं शंकुकर्णः सायुधः सपरिवारः सशक्तिस्तृप्यताम् । ओं सर्पनेत्रः सायुधः सपरिवारः सशक्तिक स्तृ० । ओं सुमुखः सायुधः सपरिवारः सशक्तिकः तृ० । ओं सुप्रतिष्ठितः सायुधः सपरिवारः सशक्तिक स्तृ० । ओं सर्वे भगवद्गणाधिपतय स्तृप्यन्ताम् । ओं नित्या स्तृ० । ओं मुक्तास्तृप्यन्ताम् । ओं दिव्यास्तृप्यन्ताम् । ओं सर्वे श्रीवैष्णवास्तृप्यन्ताम्,ओंसमस्तपरिवारसहितश्रीमन्नारायणस्तृ०।ओं श्रीरामानुज स्तृ० ।।इति।। एवं वैकुण्ठपार्षदं तर्पयित्वा श्रीसूर्यनारायणं गायत्रीमन्त्रेणार्घ्यं प्रदाय वरुणं गन्धादिभिः सम्पूज्य हस्तौ सम्पुटीकृत्य यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।१।। प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेवतद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।२।। कायेन

वाचा मनसेन्द्रियैर्वा बुद्धयात्मना वा प्रकृतेस्वभावात् । करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥३॥ इति सम्प्रार्थ्य साष्टाङ्गं प्रणम्य सर्वैः सह गृहं गच्छेत् । ततः सर्वे श्रीवैष्णवा भगवन्तं परिक्रम्य इक्षुदण्डान् शकली विधाय ऐशान्यां प्रक्षिपेयुः । ततोऽर्चकद्वारा भगवतः नीराञ्जनं विधाय यथाविभवं दक्षिणामर्पयेत् । ततो यजमानः स्वाञ्जलिं दत्वा गद्यत्रयस्य पाठमाचार्य्य द्वारा कारयेत् वा स्वयं कुर्य्यात् । ततो भगवन्तं साष्टाङ्गं प्रणम्योत्थाय दिवं गतस्य चरमपद्यं श्रावयेत्, नीराञ्जनं कृत्वा पुनः प्रणमेत् ।

ततो यजमानः स्वविभवानुसारेण श्रीमद्रामानुजाचार्य्याय तथा पूर्वाचार्य्येभ्यो दक्षिणां सम्भावनारूपेण दद्यात् । भगवन्तं साष्टाङ्गं प्रणम्य स्वाचार्य्याय यथाशक्ति वस्त्रभूषणदक्षिणादिकमर्पयेत् । पुनः पाठकर्तृकेभ्यो यथायोग्यं सम्पूज्य वस्त्रादिदक्षिणादिकं दद्यात् । अन्येभ्यः श्रीवैष्णवेभ्यो यथाशक्तिदक्षिणादिभिः सन्तोषयेत् ।

ततो विसर्जनम्

ततो यजमानः स्वावाहितदेवानां गन्धाद्युपचारैः चोत्तरपूजां सम्विधाय—ओं आवाहितदेवताभ्यो नमः इत्यनेन मन्त्रेण गन्धादीन् समर्प्य नीरांजनं विधाय पुष्पाञ्जलिं समर्पयेत् । ततो भगवन्तं आवाहितदेवताश्च साष्टाङ्ग

प्रणम्य हस्तेऽक्षतपुष्पाणि गृहीत्वा विसर्जनं कुर्य्यात्—तद्यथा-—ओं उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशूर्भवा सचा। यान्तु देवगणाः सर्वे पूजामादाय मामकीम्। इष्टकामसमृद्ध्यर्थं पुनरागमनाय च। आवाहितदेवताः स्वस्थाने गच्छत। ओं यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वां योनिं गच्छ स्वाहा। एष ते यज्ञो यज्ञपते सह सूक्तवाकः सर्ववीरस्तञ्जुषस्व स्वाहा। (गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन)। यज्ञनारायण स्वस्थाने गच्छ। आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि रक्षस्व परमेश्वर। मन्त्रहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर। जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्म्मणि। सर्वं भवतु मेऽच्छिद्रं वैष्णवानां प्रसादतः। मया यत्कृतं यथाकालं यथादेशं यथाज्ञानं यथाशक्ति। श्रीवैकुण्ठोत्सवाख्यं कर्म्म तेन श्रीपापापहा महाविष्णुः प्रीयताम्। प्रमादात्कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत्। स्मरणादेवतद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः। यस्य स्मृत्या च नामोक्त्या तपोयज्ञ क्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्। ओं विष्णवे नमः ३॥ इति श्रीवैकुण्ठोत्सव प्रयोगः समाप्तः

अथ पुण्याहवाचनप्रयोगः

पुण्याहवाचनविधिं वक्ष्यामोऽथ यथाविधिः ।
प्रयोक्तुः कर्म्मणामादावन्ते चोदयसिद्धये ॥
तच्च पुण्याहवाचनं द्विविधं ऋद्धौ पूर्त्तौ च ।
ऋद्धिश्चैवतु संस्काराः विवाहान्ता प्रकीर्त्तिताः ॥
प्रतिष्ठोद्यापनादीनि पूर्त्तकर्म्मयथोदितम् ॥

अथ पुण्याहवाचन कारिका—

स्वस्तिवाचनं मन्त्रेष्टं गृह्यकर्म्मादिकेषु च ।
आचार्य्यैणापि शास्त्रेऽस्मिन्मङ्गलार्थमुदीर्य्यते ॥ १ ॥
क्रमेण कलशं स्थाप्य पूर्णपात्रान्त सर्वशः ।
वरुणं तत्र सम्पूज्य गङ्गाद्यावाहनादिकम् ॥ २ ॥
अर्चिता ब्राह्मणाः सम्यग्गन्धताम्बूलदक्षिणाः ।
तिष्ठेयुर्ब्राह्मणा युग्मा वक्तारो दर्भपाणयः ॥ ३ ॥
तिष्ठेद्वाचयिता तेषां दक्षिणस्थ उदङ्मुखः ।
अवनिगतजानुभ्यां ततो मुकुलपद्मवत् ॥ ४ ॥
अञ्जलिं शिरस्याधाय प्रणमेत्त्रिः पुनः पुनः ।
हस्ते कलशमुद्धृत्य नमेत्त्रीणि पदानि च ॥ ५ ॥
अथ वाचयितुं वाहुं दक्षिणाङ्गसमाश्रितः ।
मन इत्यादिरूपेण एकाग्रमिति चादिशेत् ॥ ६ ॥
मनसः स्म इति ब्रूयुस्ते समाहितपूर्वकाः ।
प्रसीदन्त्विति कर्त्तारः प्रसन्नाः स्म इति द्विजाः ॥ ७ ॥

शान्तिरस्त्विति विघ्नान्ताः शब्दाः पञ्चदशैवतु ।
अस्तु वाक्यं द्विजमुखाच्छ्रावयित्वा तथा परैः ॥ ८ ॥
षड्वाक्यानि अस्त्विति च इतरैरेकविंशतिः ।
प्रीयतां वाक्यपठितैरुदकस्य निषेचनम् ॥ ९ ॥
ततः षड्वाक्यपठितैर्बहिरापो निषेचनम् ।
अन्ते दशशुभं वाक्यं निकामेति ततो जपः ॥१०॥
शुक्रादयो ग्रहाश्चैकं भगवांस्त्र्यभिषेचनम् ।
उदकस्य प्रकुर्वीत् पुण्याहं वाचयेत्ततः ॥११॥
पुण्याहादि त्रिरभ्यासमन्द्रमध्योर्ध्वनिःस्वनैः ।
पुण्यं कल्याणमृद्धिश्च स्वस्तिः श्रीत्यादिपञ्चकम् ॥१२
प्रणवाद्यं त्रिराचष्टे भवत्पूर्वं भवन्त्विति ।
प्रत्युक्तविषये प्रेषस्त्रिवारं स्वस्तिरित्यतः ॥१३॥
वारुणैः पावमानीयैरभिषिच्य सपत्निकम् ।
नीराजनं ततः कुर्य्यादन्ते कर्म्मेश्वरार्पणम् ॥१४॥

अथ पुण्याहवाचनम्—पुण्याह वाचने आदौ कलश-स्थापनविधिना कलशं स्थाप्य तत्र वरुणं सम्पूज्य पुण्याहं वाचयेत् । अवनिकृतजानुमण्डलः कमलमुकुलसदृशम-ञ्जलिं शिरास्याधायानन्तरं दक्षिणेन पाणिना स्वर्णपूर्ण कलशं धारयित्वा ।

★

मुद्रक—श्रीरङ्गनाथ प्रेस, वृन्दावन—२८११२१ (मथुरा) उ०प्र०